अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS-302**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018

## एम.ए. संस्कृतम्, (सत्रम् : तृतीयसत्रम)
## गद्य, पद्य, काव्य एवं व्याकरणम्

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. अर्जुनरावणीयस्य प्रथमसर्गस्य सारं विस्तरेण लिखन्तु।
2. दशकुमारचरितस्य अष्टमोच्छ्वासे किमुल्लिखितमिति लेखनीयम्।
3. अर्जुनरावणीयस्य संक्षेपेण परिचयः लेखितव्यः।
4. अधोलिखितेषु शब्देषु त्रयः शब्दाः साधनीयाः –
   दर्शकः, जूः, हसितम्, लेखित्वा, ईषत्पानः ।
5. निम्नलिखितेषु सूत्रेषु पञ्चसूत्राणामेव सिद्धान्तकौमुदीरीत्या व्याख्या करणीया –
   स्पृहेरीप्सितः, सहयुक्तेऽप्रधाने, हृक्रोरन्यत्तरस्याम्, अधिपरी अनर्थकौ, चतुर्थी सम्प्रदाने, पराजेरसाढः, पञ्चम्यापाङ्परिभिः, आशिषि नाथः।

### खण्डः ख
### (लघूत्तरोयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

**सप्रसङ्गव्याख्या विधेया –**

1. अधोलिखितस्य गद्यस्य हिन्दी-अनुवादः करणीयः –
   ननु चतस्रो राजविद्यास्त्रयीवार्तान्वीक्षिकी दण्डनीतिरिति। तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च, तास्तावदासताम्। अधीष्व तावद् दण्डनीतिम्। इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता। सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा इति। स 'तथेति' अधीते। श्रृणोति च। तत्रैव जरां गच्छति। तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि। सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगम्यते।
2. दशकुमारचरिते चन्द्रपालितः मृगयाव्यसनस्य कान्कान् गुणान् वर्णितवान् ?
3. अधोलिखितयोः श्लोकयोः व्याख्या विधेया –

**(क)** चिचीषतो यज्ञशतेषु वेदीस्तुष्टषरिन्द्रोऽपि बभूव यस्य।
बिभित्सितः शत्रुबलानि शक्तिं बुभुत्सुरासीत्समरे न कश्चित्।।

**(ख)** क्षेत्रभूमिरपि पञ्चगोणिका दशगोणिकारासीन्महाफला।
तत्र पाति पृथिवीं पृथुप्रभे कृतवीर्यसूनौ कृतात्मनि।।

4. निम्नलिखितयोः श्लोकयोः सप्रसंगं व्याख्या करणीया –

(क) मृदुतेजसि लोहितायमाने शनकैर्याति रवावुपास्तशैलम्।
गहनेषु विमूर्च्छता वनानां तिमिरेणाशु कृतार्धशर्वरीव॥

(ख) कष्टाश्रिताः प्राप्य तमो विहङ्गास्तत्खण्डितास्सङ्कुचिता नलिन्यः।
आलोकितं लोकहितञ्च नष्टं कृष्णात्मनां सम्पदि कस्य नापत्॥

5. निम्नलिखितयोः सूत्रयोः लघुसिद्धान्तकौमुदीरीत्या व्याख्या विधेया –

(I) अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा।　　(II) समानकर्तृकयोः पूर्वकाले।

## खण्डः ग

## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. दशकुमारचरितस्य प्रणेता कः ?
2. पुण्यवर्मा कस्य देशस्य राजा आसीत् ?
3. वसुरक्षितः कः आसीत् ?
4. अर्जुनरावणीयस्य प्रणेता कः आसीत् ?
5. अर्जुनरावणीयस्य अपरं नाम किमस्ति ?
6. अर्जुनरावणीयस्य प्रथमसर्गे अष्टाध्याय्याः कस्याध्यायस्य पादस्य च सूत्रोदाहरणानि उल्लिखितानि सन्ति।
7. लघुसिद्धान्तकौमुद्याः रचयिता को वर्तते ?
8. चयः, जयः इति कस्य सूत्रस्य उदाहरण स्तः ?
9. सिद्धान्तकौमुद्याः रचयिता कः ?
10. सम्बोधनविभक्तिः केन सूत्रेण विधीयते।

---------------x---------------